© 2017 IJSRST | Volume 3 | Issue 6 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# यज्ञविवेचने वाल्मीकिरामायणस्य भूमिका



**डॉ0 अरविन्द कुमार सिंह**
**अतिथि प्रवक्ता**
**संस्कृत विभाग**
**ईश्वर शरण डिग्री कालेज,**
**इलाहाबाद**

रामायणकालीन समाजो वैदिक आसीत। तदानीं वैदिकविधिना यज्ञा अक्रियन्त। वाल्मीकिरामायणे वैदिक संस्कृतेः समुज्ज्वलं गौवान्वितं रूपं दृष्टिगोचरं भवति। वैदिकधर्मे षोडशसंस्काराणां विक्षानमस्ति। तेषां षोडश् संस्काराणां वर्णनं रामायणे यत्रतत्र प्राप्यते। तत्र अग्लिहोत्रपूर्वको विधिः क्रियते। रामायणे दशरथपुत्राणामुद्वाहप्रसंगे विवाह संस्कारस्य विस्तृतं वर्णनं प्राप्यते। तत्र उत्तमा यज्ञवेदिरचनाऽक्रियत। तां परितः अलंचकार महर्षिः वसिष्ठः। भगवान् रामः वनगमनकाले कौशल्यामातरं द्रष्टुमुपमच्छति तदा कौशल्या क्षौमवसना मन्त्रवत्कृतमंगला अग्निं जुहोति स्म। यदा भरतो रामदर्शनाय भारद्वाजं जगाम, तदा भारद्वाजो, अग्निहोत्रं करोति स्म। रामभरतमिलननाम्नि सर्गे महर्षि वाल्मीकिना यथा वर्णितम्, तेन ज्ञायते यत् रामो नित्याग्निहोत्रकर्ता आसीत्। एकस्मिन् स्थाने भरतादयः बान्धवाः मन्दाकिन्यां स्नात्वा अग्निहोत्रं कृत्वा मन्त्रान् जपित्वा रामस्य समीपं जग्मतुरित्योदादृशं वर्णनं विद्यते।

## पुत्रेष्टियज्ञः–

वेदेषु पुत्रेष्टियज्ञस्य वर्णनमुपलभ्यते। अथर्ववेदीय पुत्रेष्टियज्ञस्य परम्परायाः प्रथितं रूपमेव वाल्मीकिरामायणे प्राप्यते। दशरथो यदा पुत्रस्य प्राप्त्यर्थ पुत्रेष्टियज्ञकर्मकरणाय प्रार्थयते, तदा स तपस्वी तस्य प्रार्थनां स्वीकृत्य कथयति, **यदहं पुत्रीयामिष्टि ते साधयिष्यामि। तत्कृते च स्वानुमतिं दत्वा पुत्रेष्टियज्ञं कारयति।**[1]

## पंचमहायज्ञपरम्परा–

IJSRST196284 | Received : 09 July 2017 | Accepted : 25 July 2017 | July-August-2017 [(3) 6 : 803-805 ]

यज्ञेषु पंचमहायज्ञाः एव मुख्याः सन्ति। वाल्मीकिरामायणे पंचमहायज्ञानां सम्यक् वर्णनमुपलभ्यते। मर्यादापुरुषोत्तममरामो देवी सीतां पितृयज्ञस्य महत्त्वं वर्णयति। नससस्येष्टियज्ञने देवान् पितृन्चाभ्यर्च्य गृहस्थिनो विगतकल्भषा भवन्ति। रामायणकालीने समाजे बलिवैश्वदेवयज्ञोऽयं प्रवृत्त आसीत्। तत्कालीनसमाजे एतादृशी मान्यताप्यासीत् यत् बलिकर्म अकृत्वा भोजनं भोक्ता पापी भवति। अतः वाल्मीकिरामायणे अतिथियज्ञविषयंक वर्णनं बाहुल्येन प्राप्यते। अयोध्यायां यत्र–तत्र अतिथिशालाः स्थापिता आसन्। तासु अतिथयः तिष्ठन्ति स्म। अथर्ववेदे प्रातःकाले मध्यकाले सायंकाले च ब्रह्मयज्ञो दवेयज्ञश्च विधेयकः मन्त्रो विद्यते–

**नमस्तेऽस्त्वायते नमो अस्तु परायते।**

**नमस्ते रूद्र तिष्ठत आसीनायोत ते नमः।।**

**नमः सायं नमः प्रातर्नमो रा«यानमो दिवा।**

**भवाय च शर्वाय चोभाभ्यामकरंनमः।।**[2]

रामायणे (चा.रा.अयो. 20.14) इत्यत्र ब्रह्मयज्ञकर्मरतायाः कौसल्याया अतीव चारू वर्णनं विद्यते। स्वपुत्रस्य रामस्य सर्वतो भद्रं कामयमाना सा विष्णोर्भगवतः स्तवनं करोति।

देवयज्ञं तन्महत्वं च विज्ञाय यज्ञकर्मणि रामायणस्य पात्राणि स्वकीयां रूचिं वितन्वन्ति। राममाता कौसल्या यज्ञकर्मकालोचितपरिधानं परिधाय प्रत्यहं यथाविधि यज्ञाग्नौहव्यं जुहोति स्म।

विश्वमित्रो रामलक्ष्मणौ राजकुमारावादाय यथा गच्छति तदा स यज्ञप्रधानं दैनिकं ह्व्यं कर्तुं प्रेरयति[3] इत्यत्र सरयूनदीतटवर्तिनां तेषां वर्णनमतीव मनोहरं विद्यते।

अतिथिसत्कारं श्रेष्ठं मत्वा अभ्यागतानाम् अर्चनमनालसतया क्रियते। वाल्मीकिरामायणे राजा दशरथः श्रद्धया गृहागतान् सर्वान् अतिथिवर्यान् ब्राह्मण् अर्ध्यादिना समर्चयति ते चार्चितास्तुष्टा अतिथयः तद्नामयं धर्म्यं यशस्यं च इच्दन्ति तत्रैव।[4]

रामायणे बलिवैश्वदेवयज्ञव्यवस्था सम्यगनुपालिता दृश्यते। मुनीनाम् आश्रमपदे दिने दिने वेदाध्ययनं भूतेभ्यो बलिहोमो प्रतन्यते स्म।[5]

अनेन प्रतिभाति यत् रामायणकालीनसमाजे यज्ञः ब्राह्मणानां कार्येषु मुख्यं कर्मासीत्। तत्कालीनसमाजे वैदिकविधिना यज्ञः विधीयन्ते स्म। अतः रामायणकालीनसमाजो वैदिकधर्मी समाज आसीत्। तदानीं यज्ञाः एव विश्वशान्तेः सुखस्य च मूलम्। आधुनिकयुगेऽपि सुखमयजीवनयापनार्थमपि विशेषेण यज्ञादेः सम्पादनं प्रतिगृहं भवेत्। यद्यपि यत्रतत्र नैका सामाजिक्यः संस्थाः प्रतिनगरं नैकेषु स्थानेषु यज्ञादेः साप्ताहिंक मासिंक च सम्पादनं कुर्वन्ति, पर×चं ग्रामेष्वद्यापि न यज्ञादेः विशेषेण प्रचारः प्रसारश्च विद्यते। अतः शुद्धवातावरणाय सर्व़त्रैव यज्ञादेः क्रियाः सम्पाद्येत चेत् सर्वमपि वातावरणं सुखदं शान्तिप्रदं क्षेमकरं आयुषःवर्धकं भवेदिति निश्चयेनवक्तुं शक्यते।

## सन्दर्भ सूची


1. वाल्मीकिरामायण (बालकाण्ड–15)
2. अथर्ववेद– 11–2, 15, 16
3. वाल्मीकिरामायण (बालकाण्ड–22, 23, 24)
4. तदैव (18.43)
5. वाल्मीकिरामायण (अरण्यकाण्ड–1–3, 7, 8)